रित्युच्यते। अनुमित्यादिस्थले तु अन्तःकरणस्य न वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुराद्यसन्निकर्षात् तथा चायं घटइत्यादि प्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवस्थानात् तदुभयावच्छिन्नं चैतन्यमेकमेव विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थितत्वेन भेदाजनकत्वात्”। सचाकारस्तेषां मते बाह्यवस्तुविषयसत्त्वेन तत्सन्निकर्षेण सम्भवति। बाह्यवस्तुसत्त्वानङ्गीकर्तृमते तु अनादिवासनयैव तदाकारोल्लेख इति यथोक्तं सर्व्वदर्शन सं०”। “तस्मात् स्वव्यतिरिक्तग्राह्यविरहात्तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम्। तदुक्तम् “नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः। ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते” इति। ग्राह्यग्राहकयोरभेदश्चानुमातव्यः यत् येन वेद्यते तत्ततो न भिद्यते यथा ज्ञानेनात्मा, वेद्यन्ते ज्ञानेन नीलादयः। भेदे हि सत्यधुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियमहेतोरभावात् तदुत्पत्तेरनियामकत्वात् यश्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः अत्राप्यनादिरविच्छिन्नप्रवाहाऽभेदवासनैव निमित्तम्। यथोक्तम् ‘सहोपालम्भनियमादभेदो नीलतद्धियोः। भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये” इति। अविभागोऽपि बुद्ध्यात्मा विपर्य्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यत इति” च। न च रसवीर्य्यविपाकादि समानमाशामोदकोपार्जितमोदकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकारविधुराया अपि बुद्धेर्व्यवहर्तृपरिज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकाररूपवत्तया तिमिराद्युपहताक्षाणां केशेन्द्रनाड़ीज्ञानाभेदवदनाद्युपप्लववासनासामर्थ्याद्व्यवस्थोपपत्तेः पर्य्यनुयोगायोगात्। यथोक्तम् “अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते। विभक्तलक्षणग्राह्यग्राहकाकारविप्लवाः। तथा कृतव्यवस्थेयं केशादिज्ञानभेदवत्। यदा तदा न सञ्चोद्या ग्राह्यग्राहकलक्षणेति”। तस्माद्बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम्”। “अन्येतु न तन्मन्यन्ते तथा हि यदुक्तं ग्राह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात्। न च सहोपलम्भनियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयोरभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षव्यावृत्तिकत्वात्। ननु भेदे सहोपालम्भनियमात्मकं साधनं न स्यादिति चेन्न ज्ञानस्यान्तर्मुखतया च भेदेन प्रतिभासमानतया एकदेशत्वैककालत्वलक्षणसहत्वनियमासम्भवाच्च। नीलाद्यर्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्ययादव्यतिरेकात्। अथोच्येत ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्वद्भेदेव प्रतिभासत इति न तत्राहमुल्लेख इति। यथोक्तं “परिच्छेदान्तराद्योऽयं भागो बहिरिव स्थितः। ज्ञानस्याभेदिनो बाह्य प्रतिभासोऽप्युपप्लव” इति “यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासत” इति च। तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेः न हि वसुमित्रो बन्ध्यापुत्रवदवभासत इति प्रेक्षावानाचक्षीत भेदप्रतिभासस्य भ्रान्तत्वे अभेदप्रतिभासस्य प्रामाण्यं, तत्प्रामाण्ये च भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च अविसंवादान्नीलतादिकमेव संविदाना बाह्यमेवोपाददते जगत्युपेक्षन्तेऽवान्तरमिति व्यवस्थादर्शनाच्च। एवञ्चायमभेदसाधको हेतुर्गोमयपायसीयन्यायवदाभासतां भजेत्। अतोबहिर्वदिति वदता बाह्यं तद्ग्राह्यमेवेति भावनीयमिति भवदीय एव बाणो भवन्तं प्रहरेत्। ननु ज्ञानाभिन्नकालस्यार्थस्य बाह्यत्वमनुप्रपन्नमिति चेत् न तदनुपपन्नम् इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने स्वाकारसमर्पकतया समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः अतएव पर्य्यनुयोगपरिहारौ समग्रहीषाताम्। “भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः। हेतुत्वमेव च व्यक्तेर्ज्ञानाकारार्पणक्षममिति”। तथा च यथा पुष्ट्या भोजनमनुमीयते यथा च भाषया देशः यथा वा सम्भ्रमेण स्नेहः तथा ज्ञानाकारेण ज्ञेयमनुमेयम्”। आकारे कुशलः ठञ् आकारिकः। तत्र निपुणे त्रि०।

**आकारगुप्ति** स्त्री गुप-क्तिन् आकारस्य हृद्गतभावस्य गुप्तिर्गोपनम्। रत्यादिजनितसुखप्रसादस्य भयजनितविषादादेश्च अन्यहेतुकत्वप्रख्यापनेन वास्तविकत्वापह्नवे गोपने।

**आकारण** न० आ+कृ-णिच् ल्युट्। १आह्वाने। युच् स्त्रीत्वात् टाप्। आकारणाप्यत्र।

**आकाल** अव्य० कालपर्य्यन्तम् अव्ययी०। यत्काले निमित्तं पूर्व्वदिने जातम् तत्परदिने तत्कालपर्य्यन्ते “भार्य्याः परमगुरुसंस्थायां चाकालमभोजनं कुर्व्वीरन्निति” आपस्त०।

**आकालिक** त्रि० अकाले भवं ठञ्। १असमयोत्पन्ने वस्तुनि। स्त्रियां ङीप् “आकालिकीं वीक्ष्य मधुप्रवृत्तिमिति” कुमारः। समानकालौ आद्यन्तौ यस्य समानकालस्य आकलङादेशः